# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा-अक्टूबर-२०१९

कक्षा – आचार्यद्वितीयवर्षम् (SEM-3)　　प्रश्नपत्रम् – ४　　गुणा: - ७०

विषय: - स्वामिनारायणवेदान्तः (S)　　कोड – CC539 (NEW)　　समय: - ०३ त: ०६

दिनाङ्क: - १२-१०-२०१९　　सन्दर्भग्रन्थः – भद्रेशस्वामिविरचित – प्रश्नोपनिषदैतरेयभाष्यम्

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १　एकस्य मन्त्रस्य व्याख्या कार्या ।**　०५

१. आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः ।
एतत्सर्वं यन्मूर्तं चामूर्तं च। तस्मान्मूर्तिरेव रयिः ।।

२. अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् ।
यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च ।।

**प्रश्नः – २　एकं निबन्धात्मकोत्तरं लिखत ।**　१०

१. प्रथमप्रश्नस्य सारः।

२. श्रेयोमार्गिणां गतेः निरूपणम् ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३　एकस्य मन्त्रस्य व्याख्या कार्या ।**　०५

१. हृदि ह्येष आत्मा। अत्रैकशतं नाडीनां तासां शतंशतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्ति तासु व्यानश्चरति।।

२. स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान् न पश्यति।
अथ तदेतस्मिञ्छरीरे एतत्सुखं भवति।।

**प्रश्नः – ४　एकं निबन्धात्मकोत्तरं लिखत।**　१०

१. तृतीयस्य प्रश्नस्य सारः ।

२. स्वप्नसुषुप्त्योः कारणमपि परब्रह्म ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ एकस्य मन्त्रस्य व्याख्या कार्या।** ०५

१. तिस्रो मात्रा मृत्युमयः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः।
क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः।।

२. स ईक्षाञ्चक्रे। कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि
कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति।।

**प्रश्नः – ६ एकं निबन्धात्मकोत्तरं लिखत।** १०

१. पञ्चमस्य प्रश्नस्य सारः।

२. भारद्वाजप्रश्नतत्प्रतिवचननिरूपणम्।

## चतुर्थान्वितिः (युनिट-4)

**प्रश्नः – ७ एकस्य मन्त्रस्य व्याख्या कार्या।** ०५

१. स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्याऽमुष्मिन् स्वर्गे
लोके सर्वान् कामान् आप्त्वाऽमृतः समभवत् समभवत्।।

२. स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत।
सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनम्।।

**प्रश्न-:- ८ एकं निबन्धात्मकोत्तरं लिखत।** १०

१. सृष्टिप्रक्रियानिरूपणम्।

२. ऐतरेयोपनिषासारः।

## अन्वितयः, १-४ (Units – 1-4)

**प्रश्नः- ९ केषाञ्चन दशानामतिलघूत्तराणि देयानि।** १०

१. आथर्वणीया उपनिषत् का ?

२. भरद्वाजस्यापत्यं पुमान् कः ?

३. सूर्यस्य पौत्रः कः ?

४. कति शिष्याः ब्रह्मनिष्ठाः परंब्रह्माऽन्वेषमाणा आसन् ?

५. एते शिष्याः कं मुनिमुपसङ्गम्य प्रश्नान् पृष्टवन्तः ?

६. संवत्सरस्य कति भागाः ?

७. अश्वलायनस्य अपत्यं पुमान् कः ?
८. रेतःसेकात् कस्योत्पत्तिः ?
९. प्रजापतिशब्दवाच्यः कः ?
१०. विरजः इति कस्य विशेषणम् ?
११. मधुमक्षिकाः कमनुगच्छन्ति ?
१२. प्रावृट्कालः अर्थात् ?
१३. देवाः केन शब्देन हविः प्राप्नुवन्ति ?
१४. जाग्रदवस्थायाः स्थानम् ?
१५. ऐतरेयोपनिषत् कस्मिन् आरण्यके अन्तर्निहिता ?

*****